मनवः षट् व्यतीताः ससन्धयः । वैवस्वतस्य च मनोर्युगानां त्रिघनो गतः । अष्टाविंशाद्युगादस्माद्यातमेतत् कृतं युगम् । अतः कालम् प्रसंख्याय संख्यामेकत्र पिण्डयेत्” । सू० सि० तदानयनप्रकार उक्तः । तत्र सृष्ट्यादिकस्य अहर्गणस्यानयनमित्थम् । ब्राह्मदिनमानं मनुष्यपरिमाणेन ४३२००००००० वर्षाः रात्रिमानञ्च तथा, इत्यहोरात्रमानम् ८६४००००००० वर्षाः ब्राह्माहोरात्रमानम् ३६०गुणितं तस्य वर्षमानम् ३१५३६०००००००० एवं वर्षशतं ब्रह्मणः परमायुः ३१५३६००००००००० तस्यायुषोऽर्द्धम् १५७६८ ०००००००००वर्षागताः । मन्वन्तरसंख्या ३०६७२० ००० षड्भिर्गुणिताः १८४०३२०००० एते वर्षाः षण्णां मनूनां गताः । तथा सन्धयश्च सप्त कृतयुगप्रमाणा गतास्तत्र युगसन्धिमानम् १७२८००० कृतप्रमाणवर्षाः सप्तभिर्गुणिताः १२०९६००० वर्षाः । सप्तमस्य वैवस्वतमनोः २७युगानि गतानि तेषां समष्टिः ११६६४०००० वर्षाः सत्यादीनां त्रयाणां गतानां युगानां मानम् ३८८८००० । एवमादिसृष्टितः वर्त्तमानयुगान्तर्गतद्वापरयुगपर्य्यन्तम् । ८७५५२१९७२९४४००० वर्षाः गताः परार्द्धतः १९७२९४४०००वर्षा गताः । वर्त्तमान महायुगात् ३८८८००० वर्षागताः । एवमब्दपिण्डं कृत्वा तत्र कलियुगगताब्दापिण्डं योज्यम् । एतानि च सौरकृपाणोति३६० गुणितानि सौरदिनवृन्दानि गतानि भवन्ति । “मध्यमग्रहभुक्तिश्च सावनेन इत्युक्तेः सावनैरेव ग्रहमध्यभावज्ञानमतस्तेभ्यः सि० शि० चान्द्रसावनानयनं दर्शितम् । यथा “कथितकल्पगतोऽर्कसमागणो रविगुणो गतमाससमन्वितः । खदहनै ३०र्गुणितस्तिथिसंयुतः पृथगतोऽधिकमास १५९३३०००००० समाहतात् । रविदिनानि १५५५२- ०००००००० गताधिकमासकैः कृतदिनैः सहितो द्युगणो विधोः । पृथगतः पठितावम २५०८२५५०००० संगुणाद्विधुदिना १६०२९९९०००००० प्तगतावमवर्जितः । भवति भास्करवासरपूर्व्वको दिनगणो रविमध्यमसावनः । अधिकमासदिनक्षयशेषतोद्युघटिकादिकमत्र न गृह्यते” । “अत्र वासना । कल्पगताब्दा द्वादशगुणिता रविमासा जातास्ते चैत्रादिगतचान्द्रतुल्यैः सौरैरेव युतास्त्रिंशद्गुणा इष्टमासप्रतिपदादिगततिथितुल्यैः सौरैरेव दिनैर्युताः । एवं ते सौरा जातास्तेभ्यः पृथक्स्थितेभ्योऽधिमासानयनं त्रैराशिकेन । यदि कल्पसौरदिनैः कल्पाधिमासा लभ्यन्ते तदैभिः किमिति । फलं गताधिमासाः । तैर्दिनीकृतैः पृथक् स्थितः सौराहर्गणैः सहितश्चान्द्रो भवति । यतः सौरचान्द्रान्तरमधिमासदिनान्येव । अथ चान्द्राद् द्युगणादवमानयनं त्रैराशिकेन । यदि कल्पचान्द्राहैः कल्पावमानि लभ्यन्ते तदैभिः किमिति । फलं गतावमानि । तैरूनश्चान्द्रोऽहर्गणोऽतः कर्त्तव्यः । यतः सावनचान्द्रान्तरेऽवमान्येव । एवं कृते सति रवेर्मध्यमः सावनाहर्गणो भवति न स्फुटः । मध्यमस्फुटाहर्गणयोर्भेदो गोले कथितः । स चाहर्गणोऽर्कादिः । यतः कल्पादौ रविवासरः । अत्राऽधिमासानयनेऽधिमासशेषं न स्थाप्यम् । न पुनस्तस्माद्दिनाद्यवयवा ग्राह्याः । एवमवमशेषमपि । न तस्माद्घटिकादिकं ग्राह्यम् । नन्वनुपातः सावयवो भवति कुतस्तदवयवा न ग्राह्याः । तत्कारणं गोले कथितं व्याख्यातं च” प्रमिता० । मध्यमग्रहादप्यहर्गणानयनं तत्रैवोक्तम् । “साग्रात् स चक्राच्च खगात् कुहृम्नात् तत्कल्पचक्राप्तमहर्गणः स्यात्” । निरग्रचक्रादपि कुट्टकेन वक्ष्येऽग्रतोऽग्राच्च तथाग्रयोगात् । “ग्रहस्य भगणराशिभागकला विकला अन्ते विकलाशेषं च कुदिनैः संगुणय्य खच्छेदेन विभज्योपर्य्युपरि निक्षिपेत् । तद्यथा । भगणादिग्रहे विकलाशेषावधि कल्पकुदिनगुणे विकलाशेषस्थाने कुदिनैर्विभज्य विकलास्थाने फलं प्रक्षिप्य तत्र षष्ट्या ६० विभज्य कलास्थाने निक्षिप्यैवं भगणान्तं यावत् । तत्र कल्पभगणैर्हृतेऽहर्गणः स्यात् । अत्रोपपत्तिर्विलोमगणितेन । तथा निरग्रचक्रादपि ग्रहात् तथा केवलादग्रादपि तथा शेषयोः शेषाणां वा योगादहर्गणानयनमग्रत इति प्रश्नाध्याये कुट्टकविधिना वक्ष्यते” प्रमि० । कलिगतादप्यहर्गणानयनं तत्रैव । “कलिगतादथ वा दिनसञ्चये दिनपतिर्भृगुजप्रभृतिस्सदा । कलिमुखध्रुवकेण समन्वितो भवति तद्द्युगणोद्भवखेचरः” । “अत्र कलिगताहर्गणेऽयं विशेषः । शुक्राद्यो वारो गणनीयः । यतः कल्पगताहर्गणात् कलिमुखे शुक्रवारो भवति । तत्र च ये ग्रहास्ते ध्रुवसंज्ञाः कल्पिताः । तद्द्युगणभवः खेचरश्च कलिमुखध्रुवकेण समन्वितः कार्य्य इत्यत्र वासनापि सुगमा” प्रमि० । कुट्टकविधिश्च वीजगणिते दर्शितो यथा । “अस्य गणितस्य ग्रहगणिते महानुपयोगः । तदर्थं किञ्चिदुच्यते । “कल्प्याथ शुद्धिर्विकलावशेषं षष्टिश्च भाज्यः